# श्रीमद् भागवत रसिक कुटुंब

## सिद्ध कुंजिका,श्रीदुर्गासप्तशती (द्वादश अध्याय)

श्रृणु देवि प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम्।
येन मन्त्रप्रभावेण, चण्डीजापः(श्) शुभो भवेत्॥1॥

न कवचं(न्) नार्गलास्तोत्रं(ङ्), कीलकं(न्) न रहस्यकम्।
न सूक्तं(न्) नापि ध्यानं(ञ्) च , न न्यासो न च वार्चनम्॥2॥

कुञ्जिकापाठमात्रेण, दुर्गापाठफलं(ल्ँ) लभेत्।
अति गुह्यतरं(न्) देवि, देवानामपि दुर्लभम्॥3॥

गोपनीयं(म्) प्रयत्नेन, स्वयोनिरिव पार्वति।
मारणं(म्) मोहनं(वँ) वश्यं(म्), स्तम्भनोच्चाटनादिकम्।
पाठमात्रेण सं(म्)सिद्ध्येत्, कुञ्जिकास्तोत्रमुत्तमम्॥4॥

अथ मंत्रः
ॐ ऐं ह्रीं(ङ्) क्लीं(ञ्) चामुण्डायै विच्चे ॥
ॐ ग्लौं हुं(ङ्) क्लीं(ञ्) जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल
ऐं ह्रीं(ङ्) क्लीं(ञ्) चामुण्डायै विच्चे ज्वल हं सं(लँ) लं(ङ्) क्षं फट् स्वाहा॥

॥इति मंत्रः॥

नमस्ते रुद्ररूपिण्यै , नमस्ते मधुमर्दिनि।
नमः(ख्) कैटभहारिण्यै, नमस्ते महिषार्दिनि॥1॥

नमस्ते शुम्भहन्त्र्यै च, निशुम्भासुरघातिनि।
जाग्रतं(म्) हि महादेवि, जपं(म्) सिद्धं(ङ्) कुरुष्व मे॥2॥

ऐं(ङ्)कारी सृष्टिरूपायै, ह्रीं(ङ्)कारी प्रतिपालिका।
क्लीं(ङ्)कारी कामरूपिण्यै, बीजरूपे नमोऽस्तु ते॥3॥

चामुण्डा चण्डघाती च, यैकारी वरदायिनी।
विच्चे चाभयदा नित्यं(न्), नमस्ते मन्त्ररूपिणि॥4॥

धां(न्) धीं(न्) धूं(न्) धूर्जटेः(फ्) पत्नी, वां(वँ) वीं(वँ) वूं(वँ) वागधीश्वरी।
क्रां(ङ्) क्रीं(ङ्) क्रूं(ङ्) कालिका देवि , शां(म्) शीं(म्) शूं(म्) मे शुभं(ङ्) कुरु॥5॥

हुं(म्) हुं(म्) हुं(ङ्)काररूपिण्यै , जं(ञ्) जं(ञ्) जं(ञ्) जम्भनादिनी।
भ्रां(म्) भ्रीं(म्) भ्रूं(म्) भैरवी भद्रे , भवान्यै ते नमो नमः॥6॥

अं(ङ्) कं(ञ्) चं(ण्) टं(न्) तं(म्) पं(यँ) यं(म्) शं(वँ) वीं(न्) दुं(म्) ऐं(वँ) वीं(म्) हं(ङ्) क्षं(न्)
धिजाग्रं(न्) धिजाग्रं(न्) त्रोटय त्रोटय दीप्तं(ङ्) कुरु कुरु स्वाहा॥7॥

पां(म्) पीं(म्) पूं(म्) पार्वती पूर्णा , खां(ङ्) खीं(ङ्) खूं(ङ्) खेचरी तथा।
सां(म्) सीं(म्) सूं(म्) सप्तशती देव्या , मन्त्रसिद्धिं(ङ्) कुरुष्व मे॥8॥

इदं(न्) तु कुञ्जिकास्तोत्रं(म्), मन्त्रजागर्तिहेतवे।
अभक्ते नैव दातव्यं(ङ्), गोपितं(म्) रक्ष पार्वति॥
यस्तु कुञ्जिकया देवि, हीनां(म्) सप्तशतीं(म्) पठेत्।
न तस्य जायते सिद्धि- ररण्ये रोदनं(यँ) यथा॥

इति श्रीरुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे कुञ्जिकास्तोत्रं सम्पूर्णम्।

॥ॐ तत्सत्॥

# श्रीदुर्गासप्तशती (द्वादश अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ अथ श्रीदुर्गासप्तशती ॥

॥ अथ द्वादशोऽध्यायः ॥

। ध्यानम् ।

ॐ विद्युद्दामसमप्रभां(म्) मृगपतिस्कन्धस्थितां(म्) भीषणां(ङ्),
कन्याभिः(ख्) करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखां(म्)श्चापं(ङ्) गुणं(न्) तर्जनीं(म्),
बिभ्राणामनलात्मिकां(म्) शशिधरां(न्) दुर्गां(न्) त्रिनेत्रां(म्) भजे ॥

ॐ देव्युवाच ॥ 1॥

एभिः(स्) स्तवैश्च मां(न्) नित्यं(म्), स्तोष्यते यः(स्) समाहितः ।
तस्याहं(म्) सकलां(म्) बाधां(न्), नाशयिष्याम्यसं(म्)शयम् ॥ 2॥

मधुकैटभनाशं(ञ्) च, महिषासुरघातनम् ।
कीर्तयिष्यन्ति ये तद्वद्, वधं(म्) शुम्भनिशुम्भयोः ॥ 3॥

अष्टम्यां(ञ्) च चतुर्दश्यां(न्) , नवम्यां(ञ्) चैकचेतसः ।
श्रोष्यन्ति चैव ये भक्त्या, मम माहात्म्यमुत्तमम् ॥ 4॥

न तेषां(न्) दुष्कृतं(ङ्) किञ्चिद्, दुष्कृतोत्था न चापदः ।
भविष्यति न दारिद्र्यं(न्) , न चैवेष्टवियोजनम् ॥ 5॥

शत्रुतो न भयं(न्) तस्य, दस्युतो वा न राजतः ।
न शस्त्रानलतोयौघात्- कदाचित्सम्भविष्यति ॥ 6॥

तस्मान्ममैतन्माहात्म्यं(म्), पठितव्यं(म्) समाहितैः ।
श्रोतव्यं(ञ्) च सदा भक्त्या, परं(म्) स्वस्त्ययनं(म्) हि तत् ॥ 7॥

उपसर्गानशेषां(म्)स्तु, महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं(म्), माहात्म्यं(म्) शमयेन्मम ॥ 8॥

यत्रैतत्पठ्यते सम्यङ्- नित्यमायतने मम ।
सदा न तद्विमोक्ष्यामि, सान्निध्यं(न्) तत्र मे स्थितम् ॥ 9॥

बलिप्रदाने पूजाया- मग्निकार्ये महोत्सवे ।
सर्वं(म्) ममैतच्चरित- मुच्चार्यं(म्) श्राव्यमेव च ॥ 10॥

जानताऽजानता वापि,  बलिपूजां(न्) तथा कृताम् ।
प्रतीच्छिष्याम्यहं(म्) प्रीत्या,  वह्निहोमं(न्) तथा कृतम् ॥ 11॥

शरत्काले महापूजा , क्रियते या च वार्षिकी ।
तस्यां(म्) ममैतन्माहात्म्यं(म्) , श्रुत्वा भक्तिसमन्वितः ॥ 12॥

सर्वाबाधाविनिर्मुक्तो,  धनधान्यसमन्वितः ।
मनुष्यो मत्प्रसादेन,  भविष्यति न सं(म्)शयः ॥ 13॥

श्रुत्वा ममैतन्माहात्म्यं(न्),  तथा चोत्पत्तयः(श्) शुभाः ।
पराक्रमं(ञ्) च युद्धेषु,  जायते निर्भयः(फ्) पुमान् ॥ 14॥

रिपवः(स्) सङ्क्षयं(यँ) यान्ति , कल्याणं(ञ्) चोपपद्यते ।
नन्दते च कुलं(म्) पुं(म्)सां(म्) , माहात्म्यं(म्) मम शृण्वताम् ॥ 15॥

शान्तिकर्मणि सर्वत्र , तथा दुः(स्)स्वप्नदर्शने ।
ग्रहपीडासु चोग्रासु,  माहात्म्यं(म्) शृणुयान्मम ॥ 16॥

उपसर्गाः(श्) शमं(यँ) यान्ति , ग्रहपीडाश्च दारुणाः ।
दुःस्वप्नं(ञ्) च नृभिर्दृष्टं(म्),  सुस्वप्नमुपजायते ॥ 17॥

बालग्रहाभिभूतानां(म्),  बालानां(म्) शान्तिकारकम् ।
सङ्घातभेदे च नृणां(म्),  मैत्रीकरणमुत्तमम् ॥ 18॥

दुर्वृत्तानामशेषाणां(म्), बलहानिकरं(म्) परम् ।
रक्षोभूतपिशाचानां(म्), पठनादेव नाशनम् ॥ 19॥

सर्वं(म्) ममैतन्माहात्म्यं(म्), मम सन्निधिकारकम् ।
पशुपुष्पार्घ्यधूपैश्च, गन्धदीपैस्तथोत्तमैः ॥ 20॥

विप्राणां(म्) भोजनैर्होमैः(फ्), प्रोक्षणीयैरहर्निशम् ।
अन्यैश्च विविधैर्भोगैः(फ्), प्रदानैर्वत्सरेण या ॥ 21॥

प्रीतिर्मे क्रियते सास्मिन्, सकृत्सुचरिते श्रुते ।
श्रुतं(म्) हरति पापानि, तथाऽऽरोग्यं(म्) प्रयच्छति ॥ 22॥

रक्षां(ङ्) करोति भूतेभ्यो, जन्मनां(ङ्) कीर्तनं(म्) मम ।
युद्धेषु चरितं(यँ) यन्मे, दुष्टदैत्यनिबर्हणम् ॥ 23॥

तस्मिञ्छ्रुते वैरिकृतं(म्), भयं(म्) पुं(म्)सां(न्) न जायते ।
युष्माभिः(स्) स्तुतयो याश्च, याश्च ब्रह्मर्षिभिः(ख्) कृताः ॥ 24॥

ब्रह्मणा च कृतास्तास्तु, प्रयच्छन्तु शुभां(म्) मतिम् ।
अरण्ये प्रान्तरे वापि, दावाग्निपरिवारितः ॥ 25॥

दस्युभिर्वा वृतः(श्) शून्ये, गृहीतो वापि शत्रुभिः ।
सिं(म्)हव्याघ्रानुयातो वा, वने वा वनहस्तिभिः ॥ 26॥

**राज्ञा क्रुद्धेन चाज्ञप्तो, वध्यो बन्धगतोऽपि वा ।**
**आघूर्णितो वा वातेन, स्थितः(फ्) पोते महार्णवे ॥ 27॥**

**पतत्सु चापि शस्त्रेषु, सङ्ग्रामे भृशदारुणे ।**
**सर्वाबाधासु घोरासु, वेदनाभ्यर्दितोऽपि वा ॥ 28॥**

**स्मरन्ममैतच्चरितं(न्), नरो मुच्येत सङ्कटात् ।**
**मम प्रभावात्सिं(म्)हाद्या दस्यवो वैरिणस्तथा ॥ 29॥**

**दूरादेव पलायन्ते, स्मरतश्चरितं(म्) मम ॥ 30॥**

**ऋषिरुवाच ॥ 31॥**

**इत्युक्त्वा सा भगवती, चण्डिका चण्डविक्रमा ॥ 32॥**

**पश्यतामेव देवानां(न्), तत्रैवान्तरधीयत ।**
**तेऽपि देवा निरातङ्काः(स्), स्वाधिकारान् यथा पुरा ॥ 33॥**

**यज्ञभागभुजः(स्) सर्वे, चक्रुर्विनिहतारयः ।**
**दैत्याश्च देव्या निहते, शुम्भे देवरिपौ युधि ॥ 34॥**

**जगद्विध्वं(म्)सिनी तस्मिन्, महोग्रेऽतुलविक्रमे ।**
**निशुम्भे च महावीर्ये, शेषाः(फ्) पातालमाययुः ॥ 35॥**

**एवं(म्) भगवती देवी , सा नित्यापि पुनः(फ्) पुनः ।**
**सम्भूय कुरुते भूप,  जगतः(फ्) परिपालनम् ॥ 36॥**

**तयैतन्मोह्यते विश्वं(म्),  सैव विश्वं(म्) प्रसूयते ।**
**सा याचिता च विज्ञानं(न्),  तुष्टा ऋद्धिं(म्) प्रयच्छति ॥ 37॥**

**व्याप्तं(न्) तयैतत्सकलं(म्),  ब्रह्माण्डं(म्) मनुजेश्वर ।**
**महाकाल्या महाकाले,  महामारीस्वरूपया ॥ 38॥**

**सैव काले महामारी , सैव सृष्टिर्भवत्यजा ।**
**स्थितिं(ङ्) करोति भूतानां(म्) , सैव काले सनातनी ॥ 39॥**

**भवकाले नृणां(म्) सैव,  लक्ष्मीर्वृद्धिप्रदा गृहे ।**
**सैवाभावे तथालक्ष्मीर्- विनाशायोपजायते ॥ 40॥**

**स्तुता सम्पूजिता पुष्पैर्- धूपगन्धादिभिस्तथा ।**
**ददाति वित्तं(म्) पुत्रां(म्)श्च,  मतिं(न्) धर्मे गतिं(म्) शुभाम् ॥ 41॥**

**इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये**
**फलस्तुतिर्नाम द्वादशोऽध्यायः ॥**

**उवाच 2, अर्धश्लोकौ 2, श्लोकाः 37, एवम् 41,  एवमादितः 671**